## न बहुव्रीहौ । (२९/२२२)

सर्वनामसञ्ज्ञायां तदन्तविधेरभ्युपगमाद् बहुव्रीहेरपि सर्वाद्यन्तस्य [1]सञ्ज्ञा स्यात् इति [2]प्रतिषेध आरभ्यते । बहुव्रीहौ समासे[3] सर्वादीनि सर्वनामसञ्ज्ञानि न भवन्ति । [4]प्रियविश्वाय । प्रियोभयाय । द्व्यन्याय । त्र्यन्याय । इह च, त्वत्कपितृकः, मत्कपितृकः इत्यकज् [5]न भवति । बहुव्रीहौ इति वर्तमाने पुनर्बहुव्रीहिग्रहणं [6]भूतपूर्वमात्रेऽपि [7]प्रतिषेधो यथा स्यात्[8], वस्त्रान्तरवसनान्तराः (म. भा. १.९०) [9]इति ॥

## तृतीयासमासे । (३०/२२३)

[10]तृतीयासमासे सर्वादीनि सर्वनामसञ्ज्ञानि न भवन्ति ।[11]मासपूर्वाय । [12]संवत्सरपूर्वाय । द्व्यहपूर्वाय ।[43]त्र्यहपूर्वाय । समासे इति वर्तमाने पुनः समासग्रहणं [14]तृतीयासमासार्थवाक्येऽपि प्रतिषेधो यथा स्यात् । मासेन पूर्वाय[15] । [16]'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' (२.१.३१/६९३) इति तृतीयासमासं प्रतिपदं वक्ष्यति, तस्येदं ग्रहणम् । [17]न यस्य कस्यचित् [18]तृतीयासमासस्य । 'कर्तृकरणे कृता बहुलम्' (२.१.३२/६९४) इति–त्वयका कृतम्, मयका कृतम्[19] ॥

## द्वन्द्वे च । (३१/२२४)

द्वन्द्वे च[20] समासे सर्वादीनि सर्वनामसञ्ज्ञानि न भवन्ति । [21]पूर्वापराणाम् । कतरकतमानाम् ॥

## विभाषा जसि । (३२/२२५)

पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषा[22] आरभ्यते । द्वन्द्वे समासे जसि विभाषा सर्वादीनि सर्वनामसञ्ज्ञानि न[23] भवन्ति । कतरकतमे, कतरकतमाः । जसः कार्यं प्रति विभाषा, अकज् हि न भवति-[24]कतरकतमकाः ॥[25]

---

1. सर्वनामसञ्ज्ञा भवति ग.फ.ह. 2. प्रतिषेधोऽयम् ग.ह, प्रतिषेधपक्ष फ. 3. सञ्ज्ञोपसर्जनयोः न स्यात् इत्यधिकं ड. 4. प्रियविश्वाय नास्ति ड. 5. मा भूत् इति अ.क.ग.ड.फ.ह. 6. किम् इत्यधिकं ड. 7. अपि नास्ति ग. 8. इति फ. 9. इति नास्ति अ.क.ग.फ. 10. तृतीयायाः समासे क.ड. 11. मासेन पूर्वाय अ.फ. 12. वत्सरपूर्वाय फ. 13. त्र्यहपूर्वाय नास्ति ग. 14. तृतीयासमासवाक्ये अ, समासार्थे वाक्ये क. ड. 15. मासपूर्वाय ग, संवत्सरेण पूर्वाय इत्यधिकं ड. 16. पूर्वसदृशेत्यादिना इति फ, समानोनार्थ इति क. ड. 17. नान्यस्य क.ड. 18. सर्वादीनां इत्यधिकं क. 19. इत्यत्र अकज् भवति ग. 20. च नास्ति फ, च समासे नास्ति ड. 21. पूर्वापराधरोत्तराणाम् क. 22. विभाषेयम् ग. फ. 23. न नास्ति क.ड.फ.ह. 24. कतरकतमाः ड. ह. 25. गपुस्तके एषः भागः अधिकः––जसि गुणोऽभीष्टः । यदि यो गुणः अभीष्टः स्यात् 'अमर्थानां ह्रस्वः' इत्युक्त्वा न हि ह्रस्वयोर्गुण इत्येवं ब्रूयात् । जसि च परतो ह्रस्वान्तस्य अंगस्य गुणो भवति अग्नयः, वायवः, धेनवः । ह्रस्वस्येत्येव-ग्रामण्यः नाग्न्यः । जसादिषु छन्दसि वचनम् । 'प्राङ्णौ छन्दसि उपधायाः । णौ च उपधायाः ह्रस्वस्य' इत्यस्मादितः प्रकरणात् प्रभृति यदुच्यते तच्छन्दसि वा इति वक्तव्यम् । किं प्रयोजनम् ? अम्बे दर्वि शतकृत्वः पश्य किकिदीव्या । अम्बे अम्बुपूर्णदर्वी परापता दर्वेऽधशप्तमित्वः शतकृत्वः पश्वे नृत्यः पशवे किकिदीव्या वाषेण किकिदीविना । ऋतो ङि सर्वनामस्थानयोः परतो गुणो भवति–मातरि, पितरि । सर्वनामस्थाने–मातरौ, पितरौ, मातरम्, पितरम् । मातरौ । तपरकरणं मुखसुखार्थम् । घेर्ङिति घ्यन्तस्याङ्गस्य ङिति प्रत्यये परतो गुणो भवति-अग्नये, कवये । अग्नेरागच्छ । अग्नेः स्वम् । घेरिति किम्–सख्ये । ङिति इति किम् ? अग्निभ्यां, वायुभ्याम् । सुपीत्येव–पट्वीकुरुतः । आण्नद्याः – नद्यन्तात् अंगादुत्तरस्य ङिद्वचनस्य अडागमो भवति । कुमार्यै, किशोर्यै । ब्रह्मबन्धो । कुमार्यः । ब्रह्मबन्ध्वा । याडापः आबन्तादंगस्य आबन्तादंगादुत्तरस्य आङितोः याडागमो भवति-खट्वायै । बहुराजायै । कारीषगन्ध्यायै । खट्वायाः, बहुराजायाः, कारीषगन्ध्यायाः । खट्वायाम्, बहुराजायां, कारीषगन्ध्यायाम् । 'अतिखट्वाय' इत्यत्र अकृते दीर्घेति दीर्घग्रहणमिति वचनात् याडागमो न भवति। कृते च लाक्षणिकत्वान्न भवति । 'सर्वनाम्नः स्याद्ध्रस्वश्च'–आबन्तात् सर्वनाम्नः अंगादुत्तरस्य अचि तस्याडागमो भवति । ह्रस्वश्च सर्वनाम्नः– सर्वस्यै, विश्वस्यै । यस्यै, कस्यै, तस्यै । सर्वस्याः । तस्याः । आब् इत्येव । भवत्यै, भवत्या । विभाषा द्वितीयातृतीयाभ्याम् उत्तरस्य ङितो विभाषा स्यात् आडागमो भवति । 'ह्रस्वश्च सर्वनाम्नः –द्वितीयस्यै, द्वितीयायै । तृतीयस्यै तृतीयायै । 'ङेराम्नद्याम्नीभ्यः'–नद्यन्तात् आबन्तात् ङिशब्दाच्चोत्तरस्य ङेराम् आदेशो भवति । कुमार्याम्, किशोर्याम् । ब्रह्मबन्ध्वाम् । खट्वायाम् । मालायाम् । बहुराज्यायाम् । ग्रामण्याम् । सेनान्याम् । इदुद्भ्यां नदीग्रहणमनुवर्तते । नदीसञ्ज्ञाभ्यां ईकारोकाराभ्यामुत्तरस्य ङेराम् आदेशो भवति । कृत्यां, धेन्वाम् । औत् – इदुद्भ्यामुत्तरस्य ङेरौकारादेशो भवति । यन्नदीसञ्ज्ञकं नापि घिसञ्ज्ञकं यद् इकारोकारान्तं तदिहोदाहरणम् । सख्यौ, पत्यौ । 'अच्च घेः' घेः उत्तरस्य ङेरौकारादेशो भवति । घेश्च अकारः–अग्नौ, वायौ, कृतौ, धेनौ । अदिदुत्करणं स्त्रियां डापो निवृत्त्यर्थम् । औदच्चघेरिति येषामेकमेवेदं सूत्रं ते प्रधानमिष्टं इदुद्भ्यां कार्यं प्रति विभाषा अकज्झि न भवति । कतरकतमाः ।